नारद उवाच ।।[१]
धनाधिपस्य जंभेन साश्वकर्ममर्म भेदिभिः ।।
दिशोपरुद्धाः क्रुद्धेन सैन्यं चाभ्यर्दितं भृशम् ।। १

~~किमने~~ [२]तं[२]दृष्ट्वा[३] कर्म दैत्यस्य धनाध्यक्षः प्रतापवान् ।।
आकर्णा कृष्टचापस्तु जंभमाजौ महाबलम् ।। २

त्दृदि विव्याध बाणानां सहस्रेणाग्निवर्चसाम् ।।
स प्रहस्य ततो वीरो बाणानामयुतत्रयम् ।। ३

नियुतं च तथा कोटिमर्बुदं चाक्षिपत्क्षणात् ।।
तस्य तल्लाघवं दृष्ट्वा क्रुधो गृह्य महागदाम् ।। ४

धनाध्यक्षः प्रचिक्षेप स्वर्गेप्सु स्वधर्नं यथा ।।
मुक्तायां च गदायां वै नादो भूत्प्रलये यथा ।। ५

भूतानां बहुधा रावा जज्ञिरे खे महाभयाः ।।
४ वायुश्च सुमहाञ्जज्ञे स्वमायान्मेघ संकुलम् ।। ६

सा हि वैश्रवणस्यास्ते त्रैलोक्याभ्यर्चितागदा ।।
आयांतिं तां समालोक्य तडित्संघातदुर्दृशाम् ।। ७

---

१ ब. श्री नारद उ० ।।
२ अ. तत
३ अ. "दृष्ट्वा" नास्ति ।
४ वायुश्च सुमहान जज्ञे खवासीन्मेघ संकुले ।
अ. प्रतौ इत्यैयं पाठः ।

दैत्यो गदाविघातार्थं शस्त्रवृष्टिं मुमोच ह ।।
चक्राणि कुणपान्प्रासांछतघ्नी:[१] पट्टिशांस्तथा ।। ८

परिघान्मुशलान्वृक्षान्गिरीं श्चातुल विक्रमः ।।
कदर्थी कृत्य शस्त्राणि तानि सर्वाणि सा गदा ।। ९

कल्पांत भास्करो यद्वन्न्यपत दैत्यवक्षसि ।।
स तया गात्रभिन्नः सन्सफेन रुधिरं वमन् ।। १०

निःपपात रथाज्जंभो वसुधां गतचेतनः।।
जंभं निपतितं दृष्ट्वा कुजंभो घोर निश्चयः ।। ११

धनाधिपस्य संक्रुद्धो नादेना पूरयन्दिशः ।।
चक्रे बाणमयं[२] जालं शकुंतस्यैव पंजरम् ।। १२

विच्छिद्य बाणजालं च मायाजालमिवोत्कटम् ।।
मुमोच बाणानपरां[३]स्तस्य यक्षाधिपो बली ।। १३

चिच्छेद लीलया तांश्च दैत्यः क्रोधीव सद्वचः ।।
निष्फलास्तांस्ततो दृष्ट्वा बाणान्क्रुद्धो धनाधिपः ।। १४

---

१ कणयान् प्राज्ञान् मुखंढीः अ. पाठः ।
२ ब. समं
३ ब. परांस्वस्य

शक्तिं जग्राह दुर्धर्षां शतघंटा महास्वनाम् ।।
प्रेषिता सा तदा शक्तिर्दारयामास तं ह्रदि ।। १५

यथाल्पबोधं पुरुषं दुःखं संसार संभवम् ।।
तथास्य[1] ह्रदयं भित्वा जगाम धरणीतलम् ।। १६

निमेषात्सोभिसंस्तम्भ्य दानवो दारुणाकृतिः ।।
जग्राह पट्टिशं दैत्यो गिरीणामपि भेदनम् ।। १७

[2]स तेन पट्टिशेनाजौ धनदस्य स्तनांतरम् ।।
वाक्येन तीक्ष्णरूपेण मर्माक्षार विसर्पिणा ।। १८

निर्बिभेदाभिजातस्य ह्रदयं दुर्जनो यथा ।।
तेन पट्टिश घातेन धनेशः परिमूर्छितः ।। १९

निषसाद रथोपस्थे दुर्वाचा सुजनो यथा ।।
तथागतं तु तं दृष्ट्वा धनेशं वै मृतं[3] यथा ।। २०

राक्षसो निर्ऋतिर्देवो निशाचरबलानुगः ।।
अभिदुद्राव वेगेन कुंभं भीम विक्रमम् ।। २१

---

१ अ. ब. अथास्य

२ अ. अनेन

३ ब. भृतं

अथ दृष्ट्वाति दुर्धर्षं कुजंभो[1] राक्षसेश्वरम् ।।
नोदयामास दैत्यान्स राक्षसेशरथं प्रति ।। २२

स दृष्ट्वा नोदितां सेनां प्रबलास्त्रां सुभीषणाम् ।।
रथादाप्लुत्य वेगेन निर्ऋती राक्षसेश्वरम्[2] ।। २३

खड्गेन तीक्ष्णधारेण चर्मपाणिर धावतं ।।
प्रविश्य दान वानीकं गजः[3] पद्मसरो यथा ।। २४

लोडयामास बहुधा विनिष्कृत्य सहस्त्रशः ।।
चिच्छेद कांश्चिच्छतशो बिभेदान्यान्वरासिना ।। २५

संदृष्टौष्ठ मुखैः पृथ्वीं दैत्यानां सोऽभ्यपूरयत् ।।
ततो निःशेषितप्रायां विलोक्य स्वांचमूं तदा ।। २६

मुक्त्वा धनपतिं दैत्यैः कुजंभो निर्ऋतिं ययौ ।।
लब्ध संज्ञस्तु जंभोऽपि धनाध्यक्षपदानुगान् ।। २७

जीवग्राहं स जग्राह बद्धापाशैः सहस्त्रधा[4] ।।
मूर्तिमंति च रत्नानि पद्मादींश्च निधींस्तथा ।। २८

---

१ अ. ब. कुजंभं
२ अ. रः ।।
३ ब. जगः
४ अ. सहस्त्रशः

वाहनानि च दिव्यानि विमानानि च सर्वशः ।।
धनेशो लब्ध संज्ञस्तु तामवस्थां विलोक्य सः[१] ।। २९

निःश्वसन्दीर्घमुष्णं च रोषाताम्र विलोचनः ।।
ध्यात्वास्त्रं गारुडं दिव्यं बाणं संधायकार्मुके ।। ३०

मुमोच दानवानीके तं बाणं शत्रुदारणम् ।।
प्रथमं [२]कार्मुकं तस्य वह्निज्वालम दृश्यत ।। ३१

निश्चेरु र्विस्फुलिंगानां कोप्यो धनुषास्तथा[३] ।।
ततो ज्वालाफलं व्योम चक्रे चास्त्रं समंततः ।। ३२

तदस्त्रं सहसा दृष्ट्वा जंभो भीमपराक्रमः ।।
संवर्त मुमुचे तेन प्रशांतं[४] गारुडं तदा[५] ।। ३३

ततस्ते दानवा दृष्ट्वा कुबेरं शेषा विह्वलः ।।
अभिदुद्राव वेगेन पदातिर्धनदं नदन् ।। ३४

अथाभिमुखमायांतं दैत्यं दृष्ट्वा धनाधिपः ।।
बभूव संभ्रमाविष्टः पलायन परायणः ।। ३५

---

१ अ. ब. "च" पाठः ।
२ अ. पत्रौ "तस्य बाणस्य" इति स्यात् ।
३ अ. धनुषास्ततः
४ ब. संज्ञातं
५ ब. तथा

ततः पलायतस्तस्य मुकुटो रत्नमंडितः ।।
पपात भूतले दीप्तो रविबिंबमिवांबरात् ।। ३६

यक्षाणामभिजातानां भग्नं[1] प्रवृत्ते रणात् ।।
मर्तुं संग्राम शिरसि युक्तं नो[2] भूषणाय तत् ।। ३७

इति व्यवस्य दुर्धर्षा नानाशस्त्रास्त्रपाणयः ।।
युयुत्सवस्तथा यक्षा मुकुटं परिवार्य ते[3]।। ३८

अभिमान धना वीरा धनस्य पदानुगाः ।।
तानमर्षाच्च संप्रेक्ष्य दानवश्रेष्ठ पौरुषाः ।। ३९

भृशुण्डी[4] भीषणाकारां गृहीत्वा शैल गौरवाम् ।।
रक्षिणो मुकुटस्याथ निष्पेष निशाचरान् ।। ४०

तान्प्रमथ्याथ नियुतं मुकुटं तं स्वके रथे ।।
समारोप्यामररिपूर्जित्वा धनदमाहवे ।। ४१

धनानि च निधीन्गृह्य स्वसैन्येन समावृतः ।।
नादेन महता देवान्द्रावयामास सर्वशः ।। ४२

---

१ अ. प्रती "भग्न यं" इतिस्यात् ।
२ अ. भूषणाग्रतः ।।
३ ब. तं
४ अ. मुसंढी ब. भुषांडी

धनदो/पि[1] धनं सर्वं गृहीतो मुक्तमुर्धजः ।।
पदातिरेकः सन्त्रस्तः प्राप्यैवं दीनवत्स्थितः ।। ४३

कुंभिनाथ संसक्तेन रजनीचर नंदनः ।।
मायाममोघामाश्रित्य तामसीं राक्षसेश्वरः ।। ४४

मोहयामास दैत्येन्द्रो जगत्कृत्वा तमोमयम् ।।
ततो विफलनेत्राणि दानवानां बलानि च ।। ४५

न शेकुश्चलितुं तत्र पदादपि पदं तदा ।।
ततो नानास्त्रवर्षेण दानवानां महा[2]चमूः ।। ४६

जधान निर्ऋतिर्देवस्तमसा संवृतां भृशम् ।।
हन्यमानेषु दैत्येषु कुंभे मूढचेतसि ।। ४७

महिष्णो[3] दानवेन्द्रस्तु कल्पांतां भोदसन्निभः ।।
अस्त्रं चकार सावित्रमुल्का संघातमंडितम् ।। ४८

विजृंभत्यथ सावित्रे परमास्त्रे प्रतापिनि ।।
प्रणाशमगमत्तीव्रं तमो घोरमनंतरम् ।। ४९

---

१ अ. धनेशोपि
२ अ. चमूं
३ ब. सहिष्णो

ततोऽस्त्र विस्फुलिंगार्कं तमः शुक्लं व्यजायत ।।
प्रोत्फुल्लारुण पद्मौघं शरदीवामलं सरः ।। ५०

ततस्तमसि संशांते[1] दैत्येन्द्राः प्राप्त च[2] क्षुपः ।।
चक्रु क्रूरेण तमसा देवानीकं महाकुलम् ।। ५१

अथादाय धनुर्घोरमिषुं चाशी विषोपमम् ।।
कुंजभोऽधावत क्षिप्रं रक्षो देवलं प्रति ।। ५२

राक्षसेन्द्रस्तथायोतं द्रष्टवा तं स पदानुगः ।।
विव्याध निशितैर्बाणैः कालाशनि समस्वनैः[3] ।।

[4]नादानं न च सन्धानं न मोक्षो वास्यलक्ष्यते ।।
चिच्छेदोग्रैः शरव्रातैस्तांछरानतिलाघवात् ।। ५४

ध्वजं शरेण तीक्ष्णेन निचकर्तामरद्विषः ।।
सारथिं चास्य भल्लैर्न[5] रथनीगदपाहरत् ।। ५५

काल कल्पेन बाणेन तं च वक्षस्य ताडयत् ।।
स तु तेन प्रहारेण चकम्पे पीडितो भृशम् ।। ५६

---

१ ब. संशाता
२ अ. ब. चक्षुषः ।।
३ अ. समप्रभैः
४ अ. ब. नादान त इतिस्यात् ।
५ अ. भव्येन

दैत्येंद्रो राक्षसेन्द्रेण क्षितिकंपेनगो यथा ।।
स मुहुर्तात्समाश्वास्य मत्वा तं दुर्जयं रणे ।। ५७

पदाति[१]रासाद्य रथं रक्षो[२] वामकरेण च ।।
केशेषु निर्ऋतिं[३] गृह्य जानुनाक्रम्य च स्थितः ।। ५८

ततः खड्गेन च शिरश्छेत्तुमिच्छदमर्षणः ।।
ततः कलकलो जज्ञे[४] देवानां सुमहांस्तदा[५]।। ५९

*६ एतस्मिन्नन्तरे देवो वरुणः पाशभृद्द्रुतः ।।
पाशेन दानवेंद्रस्य बबन्धाशु भुजद्वयम् ।। ६०

ततो बद्धभुजं दैत्यं विफलीकृत पौरुषम् ।।
ताडयामास गदया दयामुत्सृज्य पाशभृत् ।। ६१

स तु तेन प्रहारेण स्त्रोतोभिः क्षतजं स्त्रवन् ।।
दधार कालमेघस्य रूपं विद्युल्लताभृतम् ।। ६२

तदव स्थागतं दृष्ट्वा कुंजभं महिषासुरः ।।
व्यावृत वदनाशवो भोक्तुमिच्छत्सुराबुभौ ।। ६३

---

१ ब. यदाति २ ब. रथो ३ ब. तं
४ अ. जातो ५ अ. तथा

*६ After the sloka No.59, there is written in the M.S.S.-A -
इति श्री स्कंद पुराणे लोकपालयुद्धं ।
The sloka No.60 begins with -- - नारद उवाच -
which is not in the P.W.

निर्ऋतिं वरुणं चैव तीक्ष्णदंष्ट्रोत्कटाननः ।।
तावभिप्रायमालोक्य तस्य दैत्यस्य दूषितम् ।। ६४

त्यक्त्वा रथावुभौ भीतौ पदाती प्रद्रुतौ द्रुतम् ।।
जग्मतुर्महिषाद्भीतौ शरणं पाकशासनम् ।। ६५

क्रुद्धोऽथ[1] महिषो दैत्यो वरुणं समुपाद्रवत् ।।
तमंतकमुखासन्नमालोक्य हिमदीधितिः ।। ६६

चक्रे शस्त्रं विसृष्टं हि हिमसंघातमुलबणम् ।।
वायव्यं चास्त्रमतुल चंद्रश्चक्रे द्वितीयकम् ।। ६७

[2] वायुना तेन चंडेन संशुष्केण हिमेन च ।।
महा हिमनिपातेन शस्त्रैश्चंद्र प्रणोदितैः ।। ६८

गात्राण्यसुर सैन्यानामदह्यंत समंततः ।।
व्यथिता दानवाः सर्वे शीतच्छादित पौरुषाः ।।६९

न शंकुश्चलितुं तत्र नास्त्राण्यादातुमेव च ।।
महिषो निष्प्रयत्नश्च शीतेनार्क पिताननः ।। ७०

---

१ अ. प्रतौ नास्ति । श्लोकार्धं त्रुटितम्

२ In the M.S.S. 'A' sloka No.68 and 69 is interchanged Is is as under -

वायुना......हिमेन च ।
व्यथिता.....पौरुषाः ।। ६८
महा........ दितैः ।
गात्राण्यसुर ..... समंततः ।। ६९

अंसमालिंग्य पाणिभ्यामुपविष्टो ह्यधोमुखः ।।
सर्वे ते निष्प्रतीकारा दैत्याश्चंद्रमसा जिताः ।। ७१

रणेच्छां दूरतस्त्यक्त्वा तस्थुस्ते जीवितार्थिनः ।।
तत्राब्रवीत्काल नेमिदैत्यान्क्रोध विदीपितः ।। ७२

भोभोः श्रृंगारिणः क्रूराः सर्वशस्त्रास्त्रपारगाः ।।
~~एकैके ऽपि क्षमो ग्रस्तुं जगत्सर्व चराचरम् ।।~~
एकैको ऽपि जगत्कृत्स्नं शक्तस्तुलयितुं भुजैः ।। ७३

एकैको ऽपि क्षमो ग्रस्तुं जगत्सर्व चराचरम् ।।
एकैकस्यापि पर्याप्ता न सर्वे ऽपि दिवौकसः ।। ७४

किं त्रस्तनयनाश्चैव समरे परिनिर्जिताः ।।
न युक्तमेतच्छूराणां विशषादित्य जन्मनाम् ।। ७५

राज्ञश्च तारकस्यापि दर्शयिष्यथ किं मुखम्[1] ।।
विरतानां रणाच्चासौक्रुद्ध[2] प्राणान्हरिष्यति ।। ७६

इति ते प्रोच्यमानांपि नोचुः किंचिन्महासुराः ।।
शीतेन नष्टश्रुतयो भ्रष्ट[3]वाक्याश्च ते तथा ।। ७७

---

१ अ. ब. मुखे
२ अ. क्रुद्धः
३ ब. भ्रट

मूकास्तथा भवन्दैत्या मृतकल्पा महारणे ।।
तान्दृष्ट्वा नष्टचेतस्कान्दैत्याँछीतेन पीडितान् ।। ७८

मत्वा कालक्षमं कार्यं कालनेमिर्महासुरः ।।
आश्रित्य मानवीं माया वितत्य च महावपुः ।। ७९

पूरयामास गगनं दिशो विदिश एव च ।।
निर्ममे दानवेन्द्रो/सौ शरीरे भास्करायुतम् ।। ८०

दिशश्चैव विदिशश्चैव पूरयामास पावकैः ।।
ततो ज्वालाकुलं सर्वं त्रैलोक्यम् भवत्क्षणात् ।। ८१

तेन ज्वाला समूहेन हिमांशुरगमद्रुतम् ।।
ततः क्रमेण विभ्रष्टं शीत[1]रश्मिमभावली ।। ८२

तद्बलं दानवेंद्राणां मायया कालनेमिनः ।।
तद्दृष्टवा दानवानीकं लब्धसंज्ञं दिवाकरः ।।
उवाचारुणमत्यर्थं कोपरक्तात लोचनः ।। ८३

दिवाकर उवाच[2] ।।
नयारुण[3] रथं शीघ्र कालनैमि रथो यतः ।। ८४

---

१ अ. सीत.....
२ दिवाकर उवाच - अं. प्रतौ इत्यंय पाठः नास्ति ।
३ ब. त्वयारुण

विमर्दे तत्र विषमे भविता भूत संक्षयः ।।
[1]जित एषशशांकोऽथ नयं यद्बलमाश्रिताः ।। ८५

इत्युक्तश्चोदयामास वर्यं गरुड पूर्वजः ।।
रथे स्थितोऽपि तैरश्वैः सितचामरधारिभिः ।। ८६

जगद्दीपोऽथ भगवांजग्राह विततं धनुः ।।
[2]शरौधो चै पांडुपुत्र क्षिप्रमासीद्विष्णुद्युतिः ।। ८७

शंबरास्त्रेण संधाय बाणमेकं ससर्जह ।।
द्वितीयं चेन्द्रजालेनायोजितं प्रमुमोचह ।। ८८

शंबरास्त्रं क्षणाच्चक्रे तेषां रूपविपर्ययम् ।।
देवानां दानवं रूपं दानवानांच दैविकम् ।। ८९

मत्वा सुरान्स्वकानेव जघ्ने घोरास्त्रलाघवात् ।।
कालनेमी रुषाविष्टः कृतांतइव संक्षये ।। ९०

शिरांसि केषांचिद पातयद्रथाद्भुजांस्तथा सारथींश्चोग्रवेगान्[3]।।
कांश्चित्पिपेषाथ रथस्य वेगात्कांश्चिथात्यद्भुतमुष्टि पातैः ।। ९१

* ४ इति श्री स्कांदे महापुराणे......तारकसैन्य देवसैन्ययोर्युद्ध –
– वर्णनं नामाष्टादशोऽध्यायः ।।

---

१ असीजित ब. पाठः

२ शरौधो पांडु तनय अ. पाठः

३ अ. वेगः

* ४ अ. इति श्री स्कंद पुराणे कालनेमि प्रकोपः ।।

ब. इति श्री स्कंद पुराणे कुमारिका खंडे अष्टादशोध्यायः ।। १८ ।।